२ राम

र्दर्शितविषयत्वात् वृत्तिसारूप्यमितरत्र ४ व्युत्थाने याश्चित्तवृत्तयः तदविशिष्टवृत्तिः
पुरुषः तथा च सूत्रं एकमेव दर्शनं ख्यातिरेव दर्शनमिति चित्तमयस्कांतमणिकल्पं स
न्निधिमात्रोपकारि दृश्यत्वेन स्वं भवति पुरुषस्य स्वामिनः तस्माच्चित्तवृत्तिबोधे पुरुषस्या
नादिः संबंधो हेतुः ४ ताः पुनर्निरोधव्या बहुत्वे सति चित्तस्य वृत्तयः पंचतय्यः क्लिष्टा
क्लिष्टाः ५ क्लेशहेतुकाः कर्माशयप्रचयक्षेत्रीभूताः क्लिष्टाः ख्यातिविषया गुणाधिकार
विरोधिन्योऽक्लिष्टाः क्लिष्टप्रवाहपतिता अप्यक्लिष्टाः क्लिष्टच्छिद्रेष्वप्यक्लिष्टा भवंति अक्लिष्ट
च्छिद्रेषु क्लिष्टा इति तथाजातीयकाः संस्काराः वृत्तिभिरेव क्रियंते संस्कारैश्च वृत्तय इत्ये
म वं वृत्तिसंस्कारचक्रमनिशमावर्तते तदेवंभूतं चित्तमवसिताधिकारमात्मकल्पेन व्यवतिष्ठते प्रलयं
वा गच्छतीति ताः क्लिष्टाश्चाक्लिष्टाश्च पंचधा वृत्तयः प्रमाणविपर्ययविकल्पनिद्रास्मृतयः ६ तत्र प्र
त्यक्षानुमानागमाः प्रमाणानि ७ इंद्रियप्रणालिकया चित्तस्य बाह्यवस्तूपरागात्तद्विषया सामान्यवि
शेषात्मनोऽर्थस्य विशेषावधारणप्रधाना वृत्तिः प्रत्यक्षं प्रमाणं फलमविशिष्टः पौरुषेयः चित्तवृत्तिबोधः राम २

वृत्तिनिरोधे[illegible]त्वसंप्रज्ञातः समाधिः तस्य लक्षणाभिधित्सयेदं सूत्रं प्रवर्त्तते योगश्चित्तवृत्ति
निरोधः २ सर्वशब्दाग्रहणात्संप्रज्ञातोपियोग इत्याख्यायते चित्तंहि प्रख्याप्रवृत्तिस्थितिशी
लत्वात्त्रिगुणं प्रख्यारूपंहि चित्तसत्वं रजस्तमोभ्यां संसृष्टमैश्वर्यविषयप्रियं भवति तदेवतमसानु
विद्धं अधर्माज्ञानावैराग्यानैश्वर्योपगं भवति तदेवप्रक्षीणमोहावरणं सर्वतः प्रद्योतमानमनु
विद्धं रजोमात्रयाधर्मज्ञानवैराग्यैश्वर्योपगं भवति तदेवरजोलेशमलापेतं स्वरूपप्रतिष्ठं सत्व
पुरुषान्यताख्यातिमात्रं धर्ममेघध्यानोपगं भवति तत्परं प्रसंख्यानमित्याचक्षते ध्यायिनः चितिशु सं६
क्तिरपरिणामिन्यप्रतिसंक्रमा दर्शितविषया शुद्धा चानंता च सत्वगुणात्मिका चेयमतो विप
रीता विवेकख्यातिरित्यतस्तस्यां विरक्तं चित्तं तामपि ख्यातिं निरुणद्धि तदवस्थं संस्कारोपगं भव
३ तिस निर्बीजः समाधिः न तत्र किंचित्संप्रज्ञायत इत्यसंप्रज्ञातः स योगश्चित्तवृत्तिनिरोध इति २
तदवस्थे चेतसि विषयाभावाद्बुद्धिबोधात्मा पुरुषः किंस्वभाव इति तदा द्रष्टुः स्वरूपेऽवस्थानं ३
स्वरूपप्रतिष्ठा तदानीं चितिः ३ य[illegible]कैवल्ये व्युत्थानचित्ते तु सति तथापि भवंती न तथा कथंत

२
१९ इदपि तद्व्यवहारतोपि तन्निबंधनत्वाल्लोकयात्राया इत्याह। तेनेति। स्यादेतद् सति बाध
केनुभवो व्यवतिनन्नैव स्थापयेदस्ति च बाधकं पक्षसत्त्वसर्वमनुवपवंयथा विज्ञानेस
च गोघटादीनि स्वभावो हि। ततः सत्त्वं हि। विरुद्धधर्मसंसर्गो हि। तत्त्वव्याप्तं तद्विरुद्धं स्थवि
रत्वधर्मसंसर्गः भावप्रवेरुपलभ्यमानो व्यापकविरुद्धोपलब्ध्या सत्त्वमपि निवर्तय
ति। प्रसिद्धं च व्याप्तिविनितदेशत्वा तद्देशत्वादतत्त्वानेकत्वं रक्तारक्तचलाचल
त्वलक्षणो विरुद्धधर्मसंसर्गो ह्युपलभ्य। यस्य पुनरिति। प्रयमभिप्रायः। पुनर्भवति
हि सत्त्वं हेतुः क्षिपतपत विकल्पांस्थूलपादको [illegible] तालिकोपि प्रतिपद्यते। अन्यथा
ऽननुभवसिद्धत्वात्। तत्रान्यदसिद्धत्वाद्धेतुः अननुभवासिद्धेः घटादीनां सत्त्वमर्थक्रिया
कारि रूपं न स्थूलत्वादन्यत्। सोपि हेतुः स्थूलत्वमपाकुर्वन्नात्मानं व्याहन्ति। न
नु न स्थूलत्वमेव सत्त्वमपि तु प्रसतो व्यावृत्तिः। स्थौल्यव्यावृत्तिश्च स्थौल्यं व्यावर्त्य
भेदाच्च व्यावर्त्तयामिद्यते। स्तस्थौल्याभावेपि न सत्त्वव्याहतिः। अन्यत्वात्। भवतु व्या
वृत्तिभेदादेव सापवितथप भेदः पत्पूर्वकास्वव साया सत्त्वस्यानुभवस्याविकल्पस्य प्र
माणास्वकोविवप इति निरूपयतु भवान्। रूपपरमाणवो [illegible] रेतरोत्पादाग्रगृहीत
परमसूक्ष्मत्वाद्यतिरेकी हि। तत्ते गंधरसस्पर्शपरमाणुभिरन्तरितानतिरेतराः। तस्मा
देतरालाग्रहेण एकघनवनप्रत्ययवत् परमार्थ[illegible]लंबनो। सन्नप्येविकल्पो [illegible]ध्यातितव १९

परमार्थसत्त्वपरमाणुषु सांवृतः प्रतिभासधर्मः स्थौल्यमित्यतस्माद्यदृष्यत्तोति नास
ति बाधके स्थूलमनुभवसिद्धं शक्यापह्नवमिति भावः तत्रैव परमाणुकादिक्रमेण गोघ
टादय उपजायन्त इति तान्प्रत्याह परमाणुप्रचयेति । परमाणूनां प्रचयः स्थूलरूपविशेषा
मः स च विशिष्टोऽन्यस्मात्परिणामान्तरागतस्वाभाविकस्वरूपं यस्य स तत्र यथोक्त गवादिर्गो
गायन्तं घटादिर्विषयस्तच्चैतदुभयमपि लोकात इति लोकः न त्वेवमत सूक्ष्मेभ्यो भिन्नो
ऽभिन्नो वास्मात् भिन्नत्वे तु यत्तदभ्रयः कथं च तदाकारः नहि घटः पटादन्यस्तदाका
रस्तदाश्रयो वा न पुनरभिन्नत्वे तु सूक्ष्मत्वमेवास्य स्थौल्यमिति न साधारणस्य स्यादतः प्राह सचेति ॥ एवमा
त्रिप्रायः नैकान्ततः परमाणुभ्यो भिन्नो घटादिरभिन्नो वा भिन्नत्वे गवाश्ववद्धर्मध
र्मिभावानुपपत्तेः अभिन्नत्वे धर्मिरूपदेव तदनुपपत्तेः । तस्मात्कथंचिद्भिन्नः कथं
चिदभिन्नश्चास्येयमवस्था च सर्वमुपपद्यते । भूतसूक्ष्माणामिति षष्ठ्याकथंचिद्भे
दमुच्यते । ज्ञालमस्त इति या भेदं । फलेन समाप्तेन न तदनुभवलक्षणेन व्यवहारलक्षणेन
वक्तेन न विप्रतिपत्तं प्रत्यनुमापितः कारणाभेदैव कारणकारणतापपत्तेस्याह ॥
स्वव्यंजकांजनं इति । साकं तदा तमस्तोधर्मी भिन्नो जैत्याः । धर्मी तरस्य व्यक्तपादिकस्य
य इति तस्यावयविनः परमाणुभ्यो व्यावृत्तरूपमादर्शयति समपाप्य इति परमाणुसाध्या
याः क्रियायाः अन्याः क्रिया मधूदकादिधारणलक्षणास्तद्धर्मक इति न केवलमनुभवा

वचनेसाधननिर्देशोनमद्वितीयःपादः॥ॐ॥उक्तानिबहिरंगानिसाधनानिधारणावक्त
व्यादेशबंधश्चित्तस्यधारणा॥१॥नाभिचक्रेहृदयपुंडरीकेमूर्ध्निज्योतिषिनासिकाग्रेजि
ह्वाग्रइत्येवमादिषुदेशेषुबाह्येवाविषयेचित्तस्यवृत्तिमात्रेणबंधइतिधारणा॥तत्रप्र
त्ययैकतानताध्यानं॥२॥तस्मिन्देशेध्येयालंबनस्यप्रत्ययस्यएकतानतासदृशप्रवा
त हःप्रत्ययांतरेणापरामृष्टोध्यानं॥तदेवार्थमात्र निर्भासंस्वरूपशून्यमिवसमाधिः॥
ध्यानमेवध्येयाकारनिर्भासंप्रत्यात्मकेनस्वरूपेणशून्यमिवयदाभवतिध्येयस्वभा
वावेशात्तदासमाधिरित्युच्यते॥तदेतद्धारणाध्यानसमाधित्रयमेकत्रसंयमः॥एक
विषयाणित्रीणिसाधनानिसंयमइत्युच्यतेतदस्यत्रयस्य तांत्रिकीपरिभाषासं
यमइति॥तज्जयात्प्रज्ञालोकः॥तस्यसंयमस्यजयात्समाधिप्रज्ञायाभवत्यालोकोयथा
यथासंयमःस्थिरपदोभवतितथातथासमाधिप्रज्ञाविशारदीभवति॥तस्यभूमिषुविनि
योगः॥तस्यसंयमस्यजितभूमेर्याअंतराभूमिस्तत्रविनियोगः॥नह्यजिताधरभूमिः॥
अंतरभूमिंविलंघ्यप्रांतभूमिषुसंयमंलभते॥तदभावाच्चकुतःतस्यप्रज्ञालोकः॥जि

र्यैर्नियुक्तमिति तदस्य प्रकाशावरणं कर्म संसारनिबंधनं प्राणायामाभ्यासात् दुर्बलं भवति
प्रतिक्षणं च क्षीयते तथा चोक्तं। तपो न परं प्राणायामात् ततो विशुद्धिर्मलानां दीप्तिश्च ज्ञान
स्येति। किंच धारणासु योग्यता मनसः॥५३॥ प्राणायामाभ्यासादेव प्रच्छर्दनविधारणाभ्यां
वा प्राणस्येति वचनात्॥ अथ कः प्रत्याहारः॥ स्वविषयासंप्रयोगे चित्तस्य स्वरूपानुकार इवेंद्रि
याणां प्रत्याहारः॥५४॥ स्वविषयाः संप्रयोगे चित्तस्य स्वरूपानुकार इवेति चित्तनिरोधे।
चित्तवन्निरुद्धानींद्रियाणि नेतरेंद्रियजयवदुपायांतरमपेक्षंते। यथा मधुकरराजम
क्षिकाउत्पतंतमनूत्पतंति निविशमानमनुविशंते तथेंद्रियाणि चित्तनिरोधे निरुद्धानी
त्येष प्रत्याहारः। ततः परमा वश्यतेंद्रियाणां॥५५॥ शब्दादिष्वव्यसनमिंद्रियजय इति के। ५५
चित्॥ सक्तिर्व्यसनं व्यस्यत्येनं श्रेयस इति॥ अविरुद्धा प्रतिपत्तिर्न्याय्या। शब्दादिसंप्रयोगः
स्वेच्छयेत्यन्ये। रागद्वेषाभावे सुखदुःखशून्यं शब्दादिज्ञानमिंद्रियजय इति केचित्।
पर चित्तैकाग्र्यादप्रतिपत्तिरेवेति जैगीषव्यः। ततश्च परमा त्वियं वश्यता यच्चित्तनिरोधे निरुद्धानी
द्रियाणि नेतरेंद्रियजयवत् प्रयत्नमुपायांतरमपेक्षंते योगिनः इति पातंजले सांख्यप्र

र्यं नियुक्तमिति तदस्य प्रकाशावरणं कर्म संसारनिबंधनं प्राणायामाभ्यासात् दुर्बलं भवति
प्रतिक्षणं च क्षीयते तथा चोक्तं। तपो न परं प्राणायामात् ततो विशुद्धिर्मलानां दीप्तिश्च ज्ञान
स्येति। किंच धारणासु योग्यता मनसः॥५३॥ प्राणायामाभ्यासादेव प्रच्छर्दनविधारणाभ्यां
वा प्राणस्येति वचनात्॥ अथ कः प्रत्याहारः॥ स्वविषयासंप्रयोगे चित्तस्य स्वरूपानुकार इवेंद्रि
याणां प्रत्याहारः॥५४॥ स्वविषयाः संप्रयोगे चित्तस्य स्वरूपानुकार इवेति चित्तनिरोधे।
चित्तवन्निरुद्धानींद्रियाणि नेतरेंद्रियजयवदुपायांतरमपेक्षंते। यथा मधुकरराजं म
क्षिका उत्पतंतमनूत्पतंति निविशमानमनुनिविशंते तथेंद्रियाणि चित्तनिरोधे निरुद्धानी
त्येष प्रत्याहारः। ततः परमावश्यतेंद्रियाणां॥५५॥ शब्दादिष्वव्यसनमिंद्रियजय इति के। ५५
चित्॥ सक्तिर्व्यसनं व्यस्यत्येनं श्रेयस इति॥ अविरुद्धा प्रतिपत्तिर्न्याय्या। शब्दादिसंप्रयोगः
स्वेच्छयेत्यन्ये। रागद्वेषाभावे सुखदुःखशून्यं शब्दादिज्ञानमिंद्रियजय इति केचित्।
५२ चित्तैकाग्र्यादप्रतिपत्तिरेवेति जैगीषव्यः। ततः परमा त्वियं वश्यता यच्चित्तनिरोधे निरुद्धानी
न्द्रियाणि नेतरेंद्रियजयवत् प्रयत्नकृतमुपायांतरमपेक्षंते योगिनः॥ इति पातंजले सांख्यप्र